'ष्यङः सम्प्रसारणं पुत्रपत्योस्तत्पुरुषे' (६.१.१३/१००३), [1]'वसोः सम्प्रसारणम्' (६.४.१३१/४३५) इति । अनुवादे वर्णः '[2]सम्प्रसारणाच्च' (६.१.१०८/३३०) इति । सङ्ख्यातानुदेशादिह न भवति–अदुहितराम् इति । [3]द्युभ्याम् इत्यत्र 'दिव उत्' (६.१.१३१/३३७) इति तपरकरणाद् दीर्घो[4] न भवति[5] । सम्प्रसारणप्रदेशाः–'वसोः सम्प्रसारणम्' (६.४.१३१/४३५) इत्येवमादयः ॥

## आद्यन्तौ टकितौ । (४६/३६)

[6]आदिः टित् भवति, अन्तः कित् भवति षष्ठीनिर्दिष्टस्य[7] । लविता[8] (७.२.३५/२१८४) । मुण्डो भीषयते[9] (७.३.४०/२५९५) । [10]टित्प्रदेशाः–'आर्धधातुकस्येड् वलादेः' (७.२.३५/२१८४) [11]इत्येवमादयः । कित्प्रदेशाः– 'भियो हेतुभये षुक्' (७.३.४०./२५९५) इत्येवमादयः ॥

## मिदचोऽन्त्यात् परः । (४७/३७)

[12]अचः इति निर्धारणे षष्ठी[13] । जातौ चेदमेकवचनम्। अचां संनिविष्टानामन्त्यादचः परो मित् भवति । स्थाने-योग-प्रत्यय[14]परत्वस्य (३.१.१,२/१८०,१८१) अयमपवादः। [15]विरुणद्धि (३.१.७८/२५४३) । [16]मुञ्चति (७.१.५९/२५४२) । पयांसि[17] (७.१.७२/३१४) । मित्प्रदेशाः–'रुधादिभ्यः श्नम्' (३.१.७८/२५४३) इत्येवमादयः ।

[७] [18]मस्जेरन्त्यात् पूर्वं नुममिच्छन्त्यनुषङ्गसंयोगादिलोपार्थम् । (म. भा. १.११५)
मग्नः (७.१.६०/२५१७) (८.२.२९/३८०) । मग्नवान् । मङ्क्ता । मङ्क्तुम्[19] ॥

## एच इग्घ्रस्वादेशे । (४८/३२३)

एचो[20] ह्रस्वादेशे कर्तव्ये [21]इक् एव ह्रस्वो[22] भवति, नान्यः । रै–[23]अतिरि। नौ–अतिनु[24] (१.२.४७/३१८)। गो–उप[25]गु (१.२.४८/६५६) । एचः इति किम् ? अतिखट्वः[26] । अतिमालः[27] । ह्रस्वादेशे इति किम् ? [28]दे३वदत्त (८.२.८६/९७) । देवद३त्त (६.१.१९८/३६५३) ॥

## षष्ठी स्थानेयोगा । (४९/३८)

परिभाषा इयं योगनियमार्था । इह शास्त्रे [29]या षष्ठी अनियतयोगा श्रूयते, सा स्थानेयोगैव भवति, नान्ययोगा । स्थानेयोगस्य निमित्तभूते सति सा प्रतिपत्तव्या । स्थानशब्दश्च प्रसङ्गवाची । [30]यथा–दर्भाणां स्थाने शरैः[31] प्रस्तरितव्यम् इति[32] दर्भाणां प्रसङ्गे इति गम्यते । एवमिहापि[33] अस्तेः स्थाने प्रसङ्गे [34]भूर्भवति । [35]भविता । भवितुम् । भवितव्यम् । [36]ब्रुवः प्रसङ्गे वचिर्भवति । वक्ता । वक्तुम् । वक्तव्यम् । प्रसङ्गे सम्बन्धस्य निमित्तभूते [37]ब्रुव इति षष्ठी ।

---

1. सूत्रमिदं नास्ति क. 2. संप्रसारणस्य ग. ब. फ. ह. 3. वाक्यमिदं नास्ति ग. फ. ब. ह. ई. 4. इह क.
5. हलः (६.४.२/२५५९) इति सम्प्रसारणदीर्घः इत्यधिकम् फ. 6. आद्यन्तौ एतौ टित्कितौ सञ्ज्ञौ भवतः ग, टिदागमः
अ. फ. 7. इति इत्यधिकम् ह. 8. तरिता फ, तरीता ग. 9. भीषयति ब. ई, जटिलो भीषयते ग, जग्रहो भीषयते ह.
10. टित्-कित्प्रदेशाः फ. 11. इत्येवमादयः । कित्प्रदेशाः इत्येतन्नास्ति फ. ह. 12. अचः––एकवचनम् नास्ति ग.
फ. ह. 13. निर्धारणषष्ठी ड. 14. योगपरत्वस्य चायमपवादः फ 15. रुणद्धि क. ड. ह. 16. मुञ्चति
नास्ति ग.फ, मुञ्चन्ति ह. 17. कुण्डानि ग, हवींषि ग. फ, सर्पींषि, यशांसि ह. 18. मस्तेः ब. 19. मङ्क्तव्यम् अ.
क. ड. फ. ग. 20. एचः स्थाने क. ह. 21. च इत्यधिकम् फ. 22. ह्रस्वो नास्ति ग. 23. अतिरै ग. 24. अतिनौ
फ. 25. उपगौ फ. 26. अतिषट्वः ब. 27. अतिमालः नास्ति क. फ. 28. हे इत्यधिकम् फ, देवदत्त ३ ह, एतन्नास्ति
ई. 29. अनियतयोगलक्षणा या षष्ठी फ, असंयोगलक्षणा या षष्ठी ग. 30. तद्यथा फ. 31. पारैः ब. 32. इत्युक्ते
ह. 33. अस्तेर्भूः (२.४.५२/२४७०) ग. ह. 34. भूभावः ह. 35. भवितुः ग. 36. ब्रुवो वचिः (२.४.५३/
२४५३) इति ग.फ. 37. सति इत्यधिकम् ह.